# शास्त्रिप्रथमवर्षम् ( प्रथमसत्रार्धं – द्वितीयसत्रार्धम्)

# पञ्चमपत्रम् , विषयः – नव्यन्यायः,

# पाठ्यक्रमनिष्पत्तयः

**ग्रन्थः – न्यायसिद्धान्तमुक्तावली (आदितः प्रत्यक्षखण्डान्तम्)**

**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

- ❖ मङ्गलाचरणस्य साफल्यसाधकप्रमाणम्, ईश्वरसाधकप्रमाणं, पदार्थानामुद्देशलक्षणविभागान्, शक्तिसादृश्ययोः क्लृप्तपदार्थेष्वन्तर्भावञ्च विजानीयुः।
- ❖ पदार्थानां द्रव्याणां च साधर्म्य-वैधर्म्ये, त्रिविधकारणानि, अन्यथासिद्धिपञ्चकं, शब्दज्ञानयोः क्षणिकत्वम्, अव्याप्यवृत्तित्वं चावगन्तुं शक्नुयुः।
- ❖ पृथिव्यादिमूर्तद्रव्याणां लक्षणविभागयोः, तत्तज्जातिसिद्धेः, तत्तच्छरीरेन्द्रियविषयाणां, तत्तदसाधारणगुणानां, पाषाणे गन्धसाधनस्य, जले माधुर्यसाधनस्य, सुवर्णे तैजसत्वसाधनस्य वायोरनुमानस्य च ज्ञानं प्राप्नुयुः।
- ❖ आकाशादिविभुद्रव्यसाधनम्, आकाशादित्रयाणाम् औपाधिकभेदम्, आत्मविभागम् आत्मत्वजातिसाधनं च विजानीयुः।
- ❖ शरीरात्मवाद-इन्द्रियात्मवाद-क्षणिकविज्ञानात्मवाद-नित्यविज्ञानात्मवाद-प्रकृतिपुरुषवादान् परिशीलयितुं, परदेहे आत्मसाधनं बोद्धुं च समर्था भवेयुः।
- ❖ प्रत्यक्षादिप्रमाणलक्षणं, प्रत्यक्षविभागं, त्वङ्मनोयोगस्य ज्ञानसामान्यहेतुत्वं, निर्विकल्पकस्यातीन्द्रियत्वम्, इन्द्रियलक्षणं च विजानीयुः।
- ❖ षड्विधलौकिकसन्निकर्षाणां प्रत्यक्षहेतुत्वम्, अभावप्रत्यक्षे अनुपलब्धेः कारणत्वं, त्रिविधालौकिकसन्निकर्षान् तज्जन्यप्रत्यक्षाणि च प्रतिपत्तुं शक्नुयुः।